No. ४६५७ - ४६५९

Title क" विवाहांगभूत वाग्दानविधिः "ख" वर्णकाचार० "ग" विवाह कर्म

Author ×

Extent ९ पत्राणि Age सं. १७८८

Subject धर्मशास्त्रम्

क विवाहांगभूतवाग्दानविधिः

ख वर्णिकाचारः

ग विवाहकर्म

पत्र ५७ —— पत्र ५९

श्रीगणेशाय नमः ॥ अथ कन्यापरीक्षणं ॥ तत्र सामुद्रिकादिशास्त्रोक्तैः शुभलक्षणैः कन्यां निरीक्ष्योद्वहेत् ॥ तदभा
वे नवमृत्पिंडान् कृत्वा शुभलक्षणं निरूपयेदिति ॥ वेदिस्थानमृत्पिंडं ।१। हलस्थानमृत्पिंडं ।२। जलाशयस्थान
मृत्पिंडं ।३। गोष्ठस्थानमृत्पिंडं ।४। चतुष्पथस्थानमृत्पिंडं ।५। द्यूतस्थानमृत्पिंडं ।६। श्मशानस्थानमृत्पिंडं ।७। ऊष
रस्थानमृत्पिंडं ।८। पूर्वोक्तसमस्तस्थानमृत्पिंडं नवमं संभावयेदिति ।९। एतान्नवपिंडान् समान् कृतलक्षणान्
सत्वा कन्यामाहूय पुष्पचंदनताम्बूलैरर्चयित्वा ॥ ॐ प्रजापतिऋषिः । यजुश्छंदः । पृथिवी देवता ॥ शुभाशुभ
ज्ञाने विनियोगः ॥ ॐ ऋतमेव प्रथमं ऋतं नात्येति कश्चन ऋत इयं पृथिवी श्रिता सर्वमिदमसौ भूयादिति ॥ अ
नेनाभिमंत्र्य शिरस्यक्षतान् दत्वा स्वहस्तेन नवपिंडानाधाय कन्यानाम गृहीत्वैषां पिंडानां मध्ये एकं गृहाण
इति ब्रूयात् ॥ पूर्वोक्तचतुर्णां मध्ये गृहीतां मुद्वहेत् संभार्यं वा गृहीतां मुद्वहेदिति ॥ छ ॥ अथ शुचिपात्रोदकम
ध्ये यवमाषान्वा निक्षिप्य कोमलालक्तावाउ[illegible]दूर्वापिनष्टि तिनोद्धर्त्तनेनोद्धर्त्तयित्वा तेनोदकेन स्नाप
यित्वा पृथक् पीतोदकेन त्रिमूर्द्धन्यभिषिंचेत् ॥ कामवेद ते इति ॥ अस्मिन्मंत्रे [illegible] ऋषिः । प्रस्तारछंदः । क
न्या देवता ॥ कन्याभिषेके विनियोगः ॥ कामवेद ते नाम मदो नामासि समानयामुं सुरा ते अभवत् ॥ परमत्र जन्मा
ग्नेस्तपसो निर्मितोऽसि स्वाहा ॥ अमुमित्येतस्मिन् स्थाने द्वितीयां तं यतिनाम गृह्णीयात् ॥ अथोत्तराभ्यां मंत्राभ्या
मुपस्थमभिषिंचेत् ॥ इमं त इति मंत्रे [illegible] ऋषिः जगतीछंदः कामो देवता ॥ उपस्थाभिषेके विनियोगः ॥ इमं त उपस्थं मधु
ना संसृजामि प्रजापतेर्मुखमेतद्द्वितीयं ॥ तेन पुंसोऽभिभवासि सर्वानवशान्वशिन्यसि राज्ञी स्वाहा ॥ इति ॥
अग्निं क्रव्यादमिति मंत्रे [illegible] ऋषिः उपरिष्टाज्ज्योतिस्त्रिष्टुप्छंदः कामो देवता उपस्थानाभिषेके विनियोगः ॥ अग्नि
क्रव्यादमकृण्वन् गुहानाः स्त्रीणामुपस्थमृषयः पुराणाः ॥ तेनाज्यमकृण्वंस्त्रैशृंगं त्वाष्ट्रं त्वयि तद्दधातु स्वाहा ॥ इति ॥
अथ ताम्बूलादिपुष्पचंदनैरर्चयित्वा वामदेव्यं गीत्वा समापयेत् ॥ अथ विवाहदिने प्रातरेव ब्राह्मणान् आमंत्र्य स्ना
नादिकं नित्यक्रियां कृत्वा मातृपूजां आभ्युदयिकं कृत्वा लग्नसमये कन्यावरौ गृहं गत्वा वेदिपृष्ठे लक्षणे

पूर्वमग्निं प्रणीयसमिधं दत्त्वा ब्रह्माणं वरपात्राण्यासादयन्ति एके इति वदन्ति ॥ अर्हणे क्रियमाणे वरसहायोऽ
ग्निप्रणयनादि कुर्यात् ॥ अन्ये इति वदन्ति संप्रदानादनन्तरं वर एव कुर्यात् ॥ एते पात्र्याणां पदानां मध्ये प्रथमं स्व
यमेवाग्निप्रणयनादि सत्वा ॥ अर्हणं प्रतिपत्तिग्रहणीयतः करोति तन्न्याय्यं ॥ पाणिग्रहणे पुरस्ताच्छालायामुपलि
प्तेग्निरूपसमाहितो भवतीति विवाहाङ्गं मन्तव्यं तत्र ॥ एको ब्राह्मणः कर्मेडजुमुदककलशं गृहीत्वाऽग्ने ...ग्निं परिक्र
म्य दक्षिणतोऽग्ने रुदङ्मुखो वाग्यतः सोदकी योऽवतिष्ठते ॥ अन्यः प्रजानि कस्त्रतोदहस्तो दक्षिणतः ॥ अग्नेः पश्चाद्
बहुपत्नेः शूर्पसुखं पर्यंजौ ज्वा... दुरंज लिमात्रा न्नामी पत्रमिश्रानासादयन्ति ॥ पात्राणि चोत्तरतोऽग्नेः खेडस्तारणो
परि उदक् बर्हिः ॥ इ मविंशतिमाज्यं संमितं दर्यं असस्तानसंमार्गकुशान्स्तुवमित्याम्नादिप्रोक्षयेदिति ॥ अथ मण्डपोप
स्थिते वरे मधुपर्कविधिः ॥ तत्र विधासंशय यजमानशास्त्रानुसारेण किं कुर्यात् ॥ किं वरशास्त्रानुसारेण कुर्यात् ॥
न्ततो यजमानस्य विधिशास्त्रानुसारेण कुर्यात् ॥ उत वरः स्वविधिशास्त्रानुसारेण कुर्यादिति ॥ विधासंशये अर्ह
णी यथाशास्त्रानुसारेण मधुपर्ककर्तव्यमिति सिद्धं ॥ अथ मण्डपोपस्थिते वरे वरप्रदेशादुत्तरतो गां बध्वोपति
ष्ठेदन्ययजमानः पुरुषः ॥ अर्हणेति मन्त्रे वासिष्ठ ऋषिः ॥ अनुष्टुप् छन्दः ॥ गौर्देवता ॥ गोरूपस्थाने विनियोगः ॥
ॐ अर्हणापुत्रवाससा धेनुरभवद्यमे ॥ सानः पयस्वती दुहा उत्तरामुत्तरां समां ॥ अथेदमहमिति वरस्ति
ष्ठं जपेत् ॥ अस्मिन्मन्त्रे वसिष्ठ ऋषिः ॥ विराट् छन्दः ॥ विराड् देवता ॥ जपे विनियोगः ॥ इदमहमिमां पद्यां विराजमन्ना
द्यायाधितिष्ठामि ॥ अथ यजमानः पुरुषाः पञ्चविंशति पञ्चविंशति कुशपत्रमयो विष्टरो गृहीत्वा विष्टरो ३
प्रतिगृह्यतां इति ब्रूयात् ॥ ततो वरः प्रतिगृह्णामीत्युक्त्वा ॥ तौ गृहीत्वा या ओषधी रिति मन्त्रे वसिष्ठ ऋषिः ॥ अ
नुष्टुप् छन्दः ॥ ओषध्यो देवता ॥ विष्टरासने विनियोगः ॥ ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ॥ ... तामस्मि
न्नासने ऽच्छिद्राः शर्म यच्छन्त्विति पंचेकं उदगग्रमासने निधायोपवेशयेत् ॥ द्वितीयं विष्टरं पादयोरधस्ता
द्दधाति ॥ या ओषधीरिति मन्त्रे वसिष्ठ ऋषिः ॥ अनुष्टुप् छन्दः ॥ ओषध्यो देवताः ॥ पादयोरधस्ताद्विष्टर निधाने
विनियोगः ॥ या ओषधीः सोमराज्ञी विष्ठिताः पृथिवीमनु ॥ तामस्मिन्पादयोरच्छिद्राः शर्म यच्छन्तेति ॥ अथ

यजमानः पुरुषाः पाद्योदकेन गृहीत्वा ॥ पाद्यं प्रतिगृह्यतामिति ब्रूयात् ॥ ततो वरः प्रतिगृह्णामीत्युक्त्वा पाद्योदके
वेक्षणं करोति ॥ यतो देवीरिति मन्त्रे वसिष्ठ ऋषिः । विराट् छन्दः । आपो देवता ॥ पाद्योदकावलोकने विनियोगः ॥
यतो देवीः प्रतिपश्याम्यापस्ततो मा राद्धिरागच्छतु ॥ अथ वरः स्वमञ्जलिनेन पूरयित्वा वामपादे परिनि
क्षिपेत् ॥ सव्यं पादमिति मन्त्रे वसिष्ठ ऋषिः । विराट् छन्दः । आपो देवता । सव्यपादप्रक्षालने विनियोगः ॥ सव्यं पादम
वनेनिजेऽस्मिन् राष्ट्रे श्रियं दधे इति ॥ पुनस्तेनैवोदकेन स्वमञ्जलिं पूरयित्वा ॥ दक्षिणपादोपरि निक्षिपेत् ॥
दक्षिणं पादमित्यस्मिन्मन्त्रे वसिष्ठ ऋषिः । विराट् छन्दः । आपो देवता ॥ दक्षिणपादप्रक्षालने विनियोगः ॥ दक्षिणं पाद
मवनेनिजेऽस्मिन् राष्ट्रे श्रियमावेशयामि ॥ पुनर्वस्तेनोदकेन स्वमञ्जलिं पूरयित्वोभयपादोपरि निक्षिपेत् ॥
पूर्वमन्यमिति मन्त्रे वसिष्ठ ऋषिः । विराट् छन्दः । आपो देवता । उभयपादप्रक्षालने विनियोगः ॥ पूर्वमन्यमपरमन्यमुभौ
पादाववनेनिजे ॥ राष्ट्रस्यर्ध्या अभयस्यावरुध्यै ॥ अथ यजमानोऽन्येनोदकेन तु स्वीवरस्य पादौ प्रक्षालयेत् ॥ अ
थ यजमानः पुरुषाः कांस्यादिपात्रस्थे साक्षतं सोदकं समिधं सुमनोयुक्तं कृत्वार्घं निवेदयीरन् ॥ अर्घं प्रति
गृह्यतामिति ब्रूयुः ॥ वरः अन्नस्येति मन्त्रेण प्रतिगृह्णीयात् ॥ अस्मिन्मन्त्रे वसिष्ठ ऋषिः । यजुश्छन्दः । राष्ट्री देव
ता ॥ अर्घग्रहणे विनियोगः ॥ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासमिति ॥ अथ यजमानः पुरुषाः आचमनीयमु
दकपात्रं गृहीत्वा ब्रूयुः ॥ आचमनीयं प्रतिगृह्यतां ॥ ततो वरः प्रतिगृह्णामीत्युक्त्वा आचामिति ॥ यशोऽसीति स
कृत् । द्विस्तूष्णीं ॥ अस्मिन्मन्त्रे वसिष्ठ ऋषिः । यजुश्छन्दः । आचमनीयं देवता ॥ आचमने विनियोगः ॥ यशोऽसि
यशो मयि धेहि सकृत् द्विस्तूष्णीं ॥ अथ यजमानः पुरुषाः दधिमधुघृतकं सपात्रस्थं कंसविहितं कृत्वा ब्रूयुः ॥
मधुपर्को मधुपर्कः प्रतिगृह्यतां ॥ ततो वरः यशसः इति मन्त्रेण प्रतिगृह्णीयात् ॥ यशसः इति मन्त्रे वसिष्ठ ऋषिः । य
जुश्छन्दः । मधुपर्को देवता ॥ मधुपर्कग्रहणे विनियोगः ॥ यशसो यशोऽसीति ॥ अथ वरः उदङ्मुख स व्यहस्ते कृत्वा
चत्वारि भक्षणानि भक्षयेत् ॥ अंगुष्ठेन सह कनिष्ठिकया प्रथमं । अनामिकया द्वितीयं । मध्यमका तृतीयं ॥ प्र
देशिन्या चतुर्थं ॥ यशसो भक्षोऽसीति त्रीणि भक्षणानि मन्त्रेण चतुर्थं तूष्णीं प्रादेशिन्या ॥ अस्मिन्मन्त्रे वसिष्ठ ऋ

ऋषिः। यजुश्छंदः। मधुपर्को देवता। मधुपर्कभक्षणे विनियोगः॥ यशसो भक्षोसि महसो भक्षोसि श्रीभक्षोसि श्रियं मयि धे
हीति मंत्रेण त्रिः पिबेत् तूष्णीं चतुर्थं प्रतिभक्षणं नाचामिति॥ पात्रं स्य कं चेत्तत उच्छिष्टं भवति। उच्छिष्टभक्षणे आत्मनाभि
प्रायश्चित्ती भवति॥ अतः सर्वभक्षांते आचामतु। उच्छिष्टः सन् मंत्रोच्चारणं कथं कुर्यात्॥ अथ मंत्रोच्चारणं किं न कुर्या
त्॥ मनुपाराशरौ॥ प्राणाहुतीषु सोमे च मधुपर्के तथैव च॥ अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः इति॥ तथा गृह्य
संग्रहः॥ मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च॥ अस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः॥ अथ वरेण चमने
कृते॥ गौर्गौर्गौरिति नापितः स्त्री ब्रूयात्॥ मुंजगामिति वरो जपेत्॥ अस्मिन्मंत्रे वसिष्ठ ऋषिः। बृहती छंदः। गौर्दे
वता॥ गोरनुमंत्रणे विनियोगः॥ मुंच गां व[illegible]रुणपाशाद्द्विषंतं मे[illegible]भिधेहि। तं जह्यमुष्य चोभयोरुत्सृज गाम
त्तु तृणानि पिबतूदकं इति च ब्रूयात्॥ द्विषंतं शास्त्रे वै कुर्वंती मीप्रति अभिधेहि च अमुष्य यजमानस्य च योद्वे
ष्टा तं अभिधेहि जहि चेति॥ उत्सृष्टायां गवि वरस्तामभिमुखो जपेत्॥ माता रुद्राणामिति। अस्मिन्मंत्रे वसि
ष्ठ ऋषिः। अनुष्टुप् छंदः। गौर्देवता॥ गोरनुमंत्रणे विनियोगः॥ माता रुद्राणां दुहिता वसूनां स्वसादित्याना
ममृतस्य नाभिः॥ प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्टेति॥ अत्र किंचिद्वा[illegible]व्यं॥ को सपा
त्रेण कथं त्र्यर्घ्यं॥ को ऽस्य नैवार्ह[illegible]णीयस्य निनयेदर्घ्यमंजलौ॥ का ऽस्यापिधानं का ऽस्थो मधुपर्को ऽसम
र्पयेत्॥ स सता ऽस मनोयुक्तमधुपर्के दधि संहिते॥ अर्घ्यं दधिमध्वाज्यं मधुपर्को विधीयते। अनेन कर्मप्रदीपवा
क्यद्वयेन अर्घ्यपात्रं च मधुपर्कद्रव्यत्रयं च मधुपर्कपात्रौ च एतत्सर्वमुक्तं तन्निरीक्ष्यात्रैवानिगदितं॥ इति अग्निहो
त्रीविष्णुकृतं मधुपर्कविधिः समाप्तः॥ अथ पंचप्रदानं॥ तच्च स्वशाखायां नाम्नातं। अविरोधाच्छिष्टत्वाद् तद्बो
ध्य॥ आश्वलायनोद्दृष्टव्यं॥ कन्यावरयमाणायामिति॥ खंडे पंचप्रदानानां विधिरुच्यते॥ तन्मूलत्वादपि कर्मप
द्धतिर्लिख्यते॥ शुचौ देशे वरपक्षीयाश्चत्वारः पुरुषाः प्राङ्मुखास्तिष्ठेति॥ कन्यापक्षीयाश्चत्वारः पुरुषाः प्रत्य
ङ्मुखाः॥ ततो दत्ता ताप्रस्प्राङ्मुखान् पुष्पचंदनतांबूलयज्ञोपवीतवस्त्रादिभिः पूजयित्वा॥ सुप्रो स्थित
मस्त्विस्याहिभिः पंचाभिद्धिढिंषौ चर्चयित्वा प्रत्यङ्मुखानपि चंदनपुष्पयज्ञोपवीततांबूलादिभिरर्चयित्वा वरे

× द्वि० मा यादात्कामो ऽदात्कामः प्रतिगृहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते ॥८॥ ×

पुण्याहं वाचयेदिति सदाचारः ॥ शास्त्रेपि चैवं ब्राह्मणान्वाचयित्वा वरं वाचयेत् ॥ अथ प्रथमं वरपुरुषाणाम् ध्ये एकः ॥
पितृपुत्रीं वदेदिति ॥ गोत्रः प्रवरः शर्मणः पौत्रः पुत्रः । अमुकशर्मा एवं द्विः ॥ कन्यापक्षीये कोऽवदेत् ॥ गोत्राः प्रवराः शर्मणः
प्रपौत्री पौत्री दुहिता अमुका । एवं द्विः । सोऽप्रतिचशिष्टाश्च लुब्धो वदेत्यं तयाग्रे तरेति ॥ अथ वरस्य पादौ प्रक्षाल्या
हते वाससी परिधाय यज्ञोपवीतं परिधाप्य च पुष्पचन्दनेन स्मर्च्य धूपं दर्शयित्वा सुप्रोक्षितमस्त्विति स्वस्ति भिर्द्विः ॥
स्वस्तिं वाचयित्वा वरस्य दक्षिणत उपविश्य स्नातकारी कन्यां दद्यादिति ॥ गोत्राय प्रवराय पौत्राय पुत्राय अमुकशर्मणे
ब्राह्मणाय ॥ दक्ष गोत्राः प्रवराः प्रपौत्री पौत्री पुत्री इयं कन्या साक्षी कारी तुभ्यं प्रददेति ॥ उदकं दर्भाक्षतयुक्तमु
दकं वरहस्ते निक्षिपेत् ॥ वरः स्वस्तीति ब्रूयात् ॥ कइदं कस्मा इत्यनेन वरः कन्यामभिमृशेत् ॥ अस्मिन्मंत्रे प्रजा
पतिर्ऋषिः ॥ यजुश्छन्दः ॥ कामो देवता ॥ कन्याभिमर्शने विनियोगः ॥ क इदं कस्मा अदात्कामः कामाय ॥ अथ दाता ब्रूया
त् ॥ धर्मे चार्थे च कामे च नातिचरितव्या त्वयेति ब्रूयात् ॥ वरोऽपि बाढमिति ब्रूयात् ॥ ततो दाता दक्षिणां पौत्रा
बहुदेयो वास्तु प्रजापतिः प्रीयेताम् ॥ तिथिकरण मुहूर्त ग्रहनक्षत्र लग्न संपदः सन्तु ॥ ॐ पुण्याहं ॥ ॐ वृद्धि
र्यो वृद्धिर्ये वृद्धिः ॥ अथ वरः ॥ ॐ स्वस्ति इति ब्रूयात् ॥ अथ पुण्याहवाचनी ॥ वेदव्यासः ॥ संप्रज्यगो धर्मात्प्राचो ह ११५
र्शने ॥ यमः ॥ पुण्याहवाचने देवे ॥ अथ वरः पूर्वाङ्ग नेत्रादुदकमन्त्रकृत्यतानाद्भि भाजने कृत्वा उदकमभि
मन्त्रयानुमंत्रयेत ॥ अनाधृष्टमसीत्यनेन यजुषा ॥ अत्र प्रजापतिर्ऋषिः ॥ यजुश्छन्दः ॥ सत्यो देवता ॥ उदका
ञ्जलिमंत्रणे विनियोगः ॥ अनाधृष्टमस्यनाधृष्यं देवानामोजो ऽभिशस्तिपा अनभिशस्तेन्य
मञ्जसा सत्यमुपगेषं स्विते मा धा इति ॥ उदकाभिमंत्रणं द्वितीयं मंत्रं यत्कक्षीवां संभिति प्रजापतिर्ऋषिः
अनुष्टुप् छन्दः ॥ विश्वेदेवा देवता उदकाभिमंत्रणे विनियोगः ॥ यत्कक्षीवां संवननं पुत्रो अङ्गिरसामभवत् ॥
तेन नोऽद्य विश्वेदेवा सं प्रियया समवीवनन् ॥ अथ तेनोदकेन समुद्रज्येष्ठा इति च तस्य त्रिरापो हिष्ठेति ति
सृभिः कन्यामभिषिंचति तत्र समुद्रज्येष्ठा इति च तस्य वसिष्ठ ऋषिः ॥ त्रिष्टुप् छन्दः ॥ आपो देवता ॥
आपो हिष्ठेति तिसृणां च सिंधुद्वीप ऋषिः ॥ गायत्री छन्दः ॥ आपो देवता ॥ कन्याभिषेके विनियोगः ॥ समुद्रज्येष्ठा ०१

यो आपोहिष्ठा० २ यासीत जावरूणो० ३ या सुवा जावरूणो० ४ ट्टतु ॥ आपोहिष्ठीयास्तिस्रो मणल्ति ॥ सप्त सुष्मणीते षट् सं०
जगती छंदः ॥ प्रजापतिर्देवता ॥ जपे विनियोगः ॥ अथ पलाशसुवर्णभूरस्यादीनां पञ्चादीनां प्रदाने यथाशक्तिः ॥ एतसु
वर्णं ॥ एतद्वस्त्रं ॥ एतावत्से त्वरि त्वा सुश्वार्यतुभ्यमहं संप्रवेशयति ॥ तत्र जनपद धर्मा ग्रामधर्मा श्च कुर्युः ॥ स्त्रियो यत्का
रयंति ॥ ग्रामवचनं च कुर्युरिति वचनात् ॥ एतत्तु केचिद्रात्रेव कुर्वंति ॥ केचिच्च वदृर्शनानंतरं ॥ उभयत्राचार प्रमाणमि
ति लाजसंप्रदानविधिः ॥ अथ वरो वेदीं गत्वाऽग्निमुपलयति ॥ इत्यादि ॥ अथ अग्न्याऽग्निस्थापने ॥ तत्र आचार्यः कुंडपश्चि
मे उपविश्याचम्य प्राणानायम्य सोमसार्म पठेत् ॥ अद्येत्यादि अग्निस्थापनमहं करिष्य इति संकल्प्य ॥ कुंडस्योत्तरतः
कर्मजन्या प्रणासादयेत् ॥ तद्यथा उदकपात्रं ॥ आसनं ॥ कुशान् ॥ बर्हिः ॥ साग्रकुशान् ॥ बर्हिः ॥ विंशति संख्याकं समिध्यो ॥
आज्यं ॥ तिस्रः समिधः कुशान् ॥ [illegible] औदुंबरस्रुवं ॥ समिधं ॥ पूर्णपात्रमित्यादि द्रव्यं प्राचं प्राचं उदगग्रं आसादयेत् ॥
तत्र आचमनं ॥ आबोध्यादि सामगानं ॥ ततः कुशैः कुंडभूमिं परिसमुह्य ॥ गोमयेनोपलिप्य ॥ सव्यं हस्तं भूमौ प्रति
प्रतिष्ठाप्य ॥ दक्षिणहस्ते कुशं गृहीत्वा कुंडस्य दक्षिणभागमिव स्यका ॥ कुशाग्रेण प्रादेशमात्रीं प्रागग्रां शुक्लवर्णां
पार्थिवीं रेखां मुल्लिख्य ॥ तेन मूलस्सक्रमेण [illegible] ष्ठया तयंगुलामुदगग्रां लोहितवर्णां आग्नेयीं उल्लिखेत् ॥ पा
ततपार्थिवीलेखायास्तत्तरतः षडंगुलीं तरस्य [illegible] त्का आग्नेयीसलग्नां प्रादेशमितां प्रागग्रां कृष्णवर्णां उल्लिख्य ॥ आ
तद्रेखातस्तावदंतरस्य त्का [illegible] तथैवाऽपरां प्रादेशमितां नीलवर्णां ऐंद्रीं उल्लिख्य ॥ तत्तस्मा
वदंतरं स्यका प्रादेशमितां प्रागग्रां पीतवर्णां सोमीं उल्लिखेत् ॥ ततः क्रमेण रेखाभ्यो गुच्छप्रादेशिनीभ्यां उल्लि
खितम् [illegible] गृहीत्वा ईशान्यां अरत्निमात्रे प्रोक्षिरस्येत् ॥ ततो अद्भिरुल्लिखितं भागं अभ्युक्षेत् ॥ ततः सुव
र्णताम्रक [illegible] स्यादीनां अन्यतमेन पात्रेणाग्निं आनीय ॥ ततः समस्तव्याहृतिमंत्रस्य प्रजापतिरृषिः ॥ बृहती छं
दः प्रजापतिर्देवता ॥ अग्निप्रणयने विनियोगः ॥ ॐ भूर्भुवःस्वरिति अग्निमुखमग्निं कुंडे स्थंडिले वा प्रणयेत् ॥ ततो
ऽग्निं प्रज्वाल्य तत्रैव समिधं दीपयेत् ॥ ततो भूर्भुवः स्वः वरदाग्निमावाहयामीत्यावाह्य संस्थापयेत् ॥ ततो वाम
हस्तमुत्थाप्य ध्यायेत् ॥ सर्वतः पाणिपादांतः सर्वतोऽक्षिशिरोमुखः ॥ विश्वरूपो महानग्निः प्रणीतः सर्वकर्मसु ॥ इति ॥

लउपहाराणिप्रोक्तानीऽस्तिच॥ ततः सव्यकरस्य वामभागे आत्माभिमुखं दक्षिणकरं कृत्वा॥ इदं भूमेरिति मंत्रेण भूमि
ग्रहं कुर्यात्॥ इदं भूमेरिति मंत्रस्य परमेष्ठी ऋषिः॥ अनुष्टुप् छंदः। भूमिर्देवता। भूमिग्रहे विनियोगः॥ इदं भूमे
र्भजामहे इदं भद्रं सुमंगलं। परा सपत्नान्बाधस्वान्येषां विंदते वस्वन्येषां विंदते धनं॥ दिवा धनं॥ रात्रिं सु॥
ततोऽग्न्यभिमुखो स्वस्थानस्थो पाणी संहत्वा पाणिभ्यां अग्नेः परिसमूहनमिमं स्तोममिति त्र्चेन कुर्यात्॥ इमं
स्तोममिति त्र्चस्य कुत्स ऋषिः। जगती छंदः। अग्निर्देवता। परिसमूहने विनियोगः॥ ॐ इमं स्तोममर्हते जात
वेदसे रथमिव संमहेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव॥ भरामेध्मं कृ
णवामा हवींषि ते चितयंतः पर्वणा पर्वणा वयं। जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव॥२
शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं। त्वमादित्याँ आवह तान्ह्युश्मस्यग्ने सख्ये मा रिषा
५ मा वयं तव॥३॥ ततोऽग्ने दक्षिणतो ब्रह्मासने स्थानेऽग्निं आरभ्य दक्षिणे यावदुदकधारामविच्छिन्नां दत्वा
ऽनेनाग्निं परिक्रम्य ब्रह्मासनप्रागग्रान् दर्भानास्तीर्य तेनैव प्रत्याव्रज्य स्वासने उपविशेत्॥ अथ ब्रह्मा आ
स्तृतानां दर्भाणां पूर्वभागे प्रत्यङ्मुख स्थित्वा सव्यस्य पाणेरंगुष्ठानामिकाऽगुलीभ्यां ब्रह्मासनाद्दर्भमेकं तृणं गृ
हीत्वा नैरृत्यां निरस्त इति मंत्रेण प्रक्षिपेत्॥ निरस्त इति मंत्रस्य प्रजापतिऋषिः। यजुश्छंदः। परावसुर्दे
वता। तृणनिरसने विनियोगः॥ ॐ निरस्तः परावसुः। ततोऽप उपस्पृश्य ब्रह्मासने उदङ्मुख आवसोरि
ति मंत्रेणोऽपविशति॥ आवसोरिति मंत्रस्य। प्रजापतिऋषिः। यजुश्छंदः। आवसुर्देवता। उपवेशने विनि
योगः॥ ॐ आवसोः सदने सीदामि। ततो ब्रह्माऽग्न्यभिमुखो वाग्यतोऽञ्जलिपुट आस्ते आकर्मसमाप्तेः॥ ततोऽग्नेः
सर्वासु दिक्षु पुरस्ताद्दक्षिणत उत्तरतः पश्चादिति क्रमेण त्रिः त्रिः पंच दश वा प्रागग्रैर्बहुकुशैः स्तृणाति। किं कुर्वे
न् प्रागग्रैः कुशैः पूर्वास्तृतानी कुशाग्रानी मूलानि छादयन्॥ तत उदक् दर्भे प्रणीतापात्रमग्नेरुत्तरतः आसा
दयेत्॥ ततो विंशति त्रिंशामात्रीय प्रजापतिं ध्यात्वा प्रागग्रं जुहुयात्॥ ततः बर्हिषः सामग्री अनंतगर्भं कुशा
द्वयं प्रादेशमात्रं पवित्रे स्थ इति मंत्रेण छिंद्यात्॥ नन नखेन॥ पवित्रे स्थ इति मंत्रस्य प्रजापतिऋषिः। य

जुष्टुप् छंदः॥ पवित्रं देवता। पवित्रच्छेदने विनियोगः॥ ॐ पवित्रे स्थो वैष्णव्यौ॥ एतत्ते पवित्रे प्रणीताद्भिर्विष्णोर्मनसेति मंत्रे
ण संमार्जयति॥ विष्णोर्मनसेति मंत्रस्य प्रजापतिर्ऋषिः। यजुश्छंदः। विष्णुर्देवता। पवित्रसंमार्जने विनियोगः॥ ॐ विष्णो
र्मनसा पूतेस्थः॥ ततः आज्यस्थाल्यां गृहीत देउदगग्रे पवित्रे कृत्वा ज्यं समावपेत्। ततोऽङ्गुष्ठाभ्यां अनामिकांगुलीभ्यां
मोदगग्रे पवित्रे गृहीत्वा देवस्त्वेति मंत्रेण आज्यं शउत्सुखमुत्पुनाति॥ छिस्तब्धीमुत्पुनाति॥ देवस्त्वेति मंत्रस्य। परमे
ष्ठी ऋषिः॥ गायत्री छंदः॥ आज्यं देवता॥ आज्योत्पवने विनियोगः॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण व
सोः सूर्यस्य रश्मिभिः॥ ततः पवित्रे प्रणीताद्भिः प्रोक्ष्याग्नौ प्रक्षिपेत्। ततः आज्यस्थाल्यां अग्नौ अधिश्रित्याऽऽसेस
त्तरत उद्वासयेत्॥ एवं आज्यसंस्कारो भवति॥ ततोऽग्नेर्दक्षिणतोऽदितेऽनुमन्यस्वेति मंत्रेण प्राक्संस्थमुद
कांजलिं प्रसिंचेत्। अदितइति मंत्रस्य प्रजापतिर्ऋषिः॥ एकपदा गायत्री छंदः॥ अग्निर्देवता॥ उदकांजलिसेचने विनि
योगः॥ ॐ अदितेऽनुमन्यस्व॥ ततोऽग्नेः पश्चादनुमतइति मंत्रेणोदक्संस्थमुदकांजलिं प्रसिंचेत्॥ अनुमत इति मंत्र
स्य॥ प्रजापतिर्ऋषिः॥ एकपदा गायत्री छंदः॥ अनुमतिर्देवता॥ उदकांजलिसेचने विनियोगः॥ ॐ अनुमतेऽनुमन्य
स्व॥ ततोऽग्नेरुत्तरतः सरस्वतीति मंत्रेण प्राक्संस्थमुदकांजलिं प्रसिंचेत्॥ सरस्वतीति मंत्रस्य॥ प्रजापति
र्ऋषिः॥ एकपदा गायत्री छंदः॥ सरस्वती देवता॥ उदकांजलिसेचने विनियोगः॥ ॐ सरस्वत्यनुमन्यस्व॥ ततो दे
व सवितरिति मंत्रेण प्रदक्षिणमग्निं पर्युक्षेत्॥ देव सवितरिति मंत्रस्य प्रजापतिर्ऋषिः॥ त्रिष्टुप् छंदः॥ सविता
देवता॥ पर्युक्षणे विनियोगः॥ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय॥ दिव्यो गंधर्वः केतुपूः के
तन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु॥ ततः समिद्दत्तानां गृहीत्वा तत्पश्चेति मंत्रमारभ्य प्राणो यस्य मा
त्मानं प्रपद्य इत्यंतं पठित्वा विरूपाक्षोऽसि मंत्रमारभ्यो भूम्यां सत्वा जपेत्॥ प्रपद विरूपाक्षयोर्मंत्रयोः प्रजा
पतिर्ऋषिः॥ यजुश्छंदः॥ राजाग्निर्देवता॥ जपे विनियोगः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च
त्यागश्च धृतिश्च धर्मश्च सत्त्वं च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवंतु भूर्भुवः स्वरों महांतमा
त्मानं प्रपद्ये विरूपाक्षोऽसि दंतांजिस्तस्य ते शय्या पर्णे गृहा अंतरिक्षे विमितं हिरण्मयं तद्देवानां हृदया

न्ययस्मये कुंभे त्रीन्तः संनिहितानि तानि बल्लभ [illegible] बलयाश्च रस्तो प्रमनी अभिलिषितः सत्यं यत्ते द्वादशपुत्रास्ते
त्वा संवत्सरे संवत्सरे कामप्रेणा यज्ञेन याचित्वा पुनर्ब्रह्मचर्यमुपयंति त्वं देवेषु ब्राह्मणोस्यहं मनुष्येषु ब्राह्म
णो वै ब्राह्मणमुपधावत्युप त्वा धावामि जपंतं मा मा प्रतिजापीर्जुह्वंतं मा मा प्रतिहोषीः कुर्वंतं मा मा प्रतिका
र्षीस्त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यतां समुद्रो माऽवि
श्वव्यचा ब्रह्मानुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोनुजा
नातु तस्मै विश्वरूपाय दंतां जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सहस्रा
क्षाय ब्रह्मणः पुत्राय नमः ॥१८॥ ति ॥ ततो हस्तस्थितास्ते ब्रह्माणं पूजयित्वा समिधं अग्नौ [illegible] निक्षिपेत् ॥
ततः स्रुवस्य पूर्वाभिमुखे मार्जनं कुशैः कुर्यात् ॥ अग्नेः तापवर्णं च ॥ वध्वसमि पीतं डर्प आगत्याहतं वाससी परि
धाय ॥ जरां गच्छ इति तन्त्रितिः प्रथमे ॥ परिधत्त धत्त वाससा इति ॥ अनयोर्मंत्रयोर्ऋषिः सविता ॥ जगती त्रिष्टुप् छंदोसि ॥ कर्तृक
नुवायश्च परिधापयस्य श्चादेवता ॥ अधरोत्तरवस्त्रपरिधाने विनियोगः ॥ या अकृंतन्नवयन्या अतन्वत याश्च
देव्यो अंतानभितो ततंथ ॥ तास्त्वा देवीर्जरसा संव्ययंत्वायुष्मतीदं परिधत्स्व वाससः ॥ परिधत्त धत्त वा
ससैनां शतायुषीं कृणुत दीर्घमायुः ॥ शतं च जीव शरदः सुवर्चा वसूनि चार्ये विभजासि जीवन् ॥ यज्ञोपवि
तवत् ॥ दक्षिणं बाहुं बहिः कृत्वा [illegible] वेदीसमीपमानयन् जपेत् । सोमोददद् इति ॥ अस्मिन्मंत्रे देवऋषिः ॥ अनु
ष्टुप् छंदः ॥ सोमो देवता ॥ जपे विनियोगः ॥ सोमो ददद्गंधर्वाय गंधर्वो ददग्नये ॥ रयिं च पुत्रांश्चादादग्निर्म
ह्यमथो इमां ॥ दक्षिणहस्तेन वामहस्तं वध्वा गृहीत्वा वेदीसमीपमानयति ॥ वेलर्वक [illegible] वस्त्रे संवेष्टिते वा
मपादेन चाश्मनयति वधूं वाचयेत् ॥ प्र मे पतियान इति ॥ अस्मिन्मंत्रे देवऋषिः त्रिष्टुप् छंदः ॥ पतिर्देवता ॥
पादप्रवर्तने विनियोगः ॥ प्र मे पतियानः पंथाः कल्पतां शिवा अरिष्टा पतिलोकं गमेयं ॥ पद्येतं मंत्रं वधूर्न ज
पति तदा ॥ प्रास्याः पतियानः पंथाः कल्पतां शिवा अरिष्टा पतिलोकं गम्या इति वरो जपेत् ॥ तस्मिंश्छंदांसि सर्वव
त् ॥ विनियोगश्च ॥ वेष्टितकटं प्रसार्य बहिः प्रापयेत् ॥ पूर्वं कटी तेषां [illegible] इलुखाव रउपाविश्यंति ॥ दक्षिताव

ध्रुवः। दक्षिणेनावरस्य दक्षिणं सरन्वारब्धायाः वध्वाः स्रुवेणाज्यं गृहीत्वा महाव्याहृतीभिस्त्रिर्जुहोति॥ भूरि
तिमंत्रस्य विश्वामित्रऋषिः। गायत्री छंदः। अग्निर्देवता। व्याहृतिहोमे०। ॐ भूः स्वाहा॥ भुवरिति जमदग्निऋषिः। उ
ष्णिक् छंदः। वायुर्देवता। व्याहृतिहोमे०। ॐ भुवः स्वाहा॥ स्वरिति मंत्रस्य भरद्वाजऋषिः। अनुष्टुप् छंदः। आदित्यो
देवता। व्याहृतिहोमे०। ॐ स्वः स्वाहा॥ अथाग्निरेतु प्रथम इत्यस्य तस्य ऋतिभिः षडाज्याहुतीर्जुहोति॥ एषु षट्सु मं
त्रेषु दक्षऋषिः। जगती छंदः। अग्निर्देवता। आज्यहोमे विनियोगः॥ अग्निरेतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु
मृत्युपाशात्। तदयं राजा वरुणोनुमन्यतां यथेयं स्त्री पौत्रमघन्नरोदात् स्वाहा॥१॥ इमामग्निस्त्रायतां गार्ह
पत्यः प्रजामस्यै जरदष्टिं कृणोतु। अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभि विबुध्यतामियं स्वाहा॥२॥
द्यौस्ते पृष्ठं रक्षतु वायुरूरू अश्विनौ च स्तनं धयंतं सविताभिरक्षत्वावाससः परिधानाद् बृहस्पतिर्वि
श्वेदेवा अभिरक्षंतु पश्चात् स्वाहा॥३॥ मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु। मा त्वं रुदत्युर आ
वधिष्ठा जीवपत्नी पतिलोके विराज पश्यंती प्रजां सुमनस्यमाना स्वाहा॥४॥ अप्रजस्यं पौत्रमर्त्यं पाप्मान
मुत वा अघं। शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं स्वाहा॥५॥ परैतु मृत्युरमृतं म आगा
द्वैवस्वतो नो अभयं कृणोतु। परं मृत्यो अनुपरेहि पंथां यत्र नो अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते
ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् स्वाहा॥६॥ द्वितीये भिजगत्यग्निस्तृतीये भिजगती विश्वेदेवाश्चतुर्थेग्निः
शाक्वरी। पंचमेग्निरुपरिष्टाद्बृहती। षष्ठे तद्धुर्वेग्निर्वेवस्वत स्त्रि स्त्रो जुहोति॥ छंदांसि देवते पूर्वे वत्। चतुर्थीं बृ
समस्तां जुहोति॥ भूर्भुवः स्वरिति मंत्रस्य प्रजापतिऋषिः। पंक्तिश्छंदः। प्रजापतिर्देवता। होमे विनियोगः॥ ॐ भूर्भु
वः स्वः स्वाहा॥ हुत्वा दंपती उत्तिष्ठतः॥ अथ वरो वधूपृष्ठतः परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते वधूं जलिं
हित्वेति। पूर्वस्यां दिशि स्थिता माता भ्राता वा वामहस्ते लाजामूर्पं गृहीत्वा दक्षिणहस्तेन वध्वा दक्षिणपादे गृ
हीत्वारोहयेत्॥ पाणिग्राहो हप्पतीममश्मानमारोहेति॥ अस्मिन्मंत्रे दक्षऋषिः। अनुष्टुप् छंदः। अश्मा देव
ता। अश्मारोहणे विनियोगः॥ इममश्मानमारोहाश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्यतः बाधस्व मा च ... तिष्ठ नाम

घ॥ कन्यांजलौ उपस्तारं दत्वा लाजानामंजलिं तत्र निक्षिप्य प्रत्युपस्तारं ददाति॥ इयं नार्युपब्रूत इति
वरो जपेत्॥ मंत्रोक्तं होमं वधूः करोति॥ अस्मिन्मंत्रे दक्षस्य ऋषिः। पंक्तिरुपरिष्टाज्ज्योतिष्मती छन्दः॥ अग्नि
र्देवता॥ लाजाहुतौ विनियोगः॥ इयं नार्युपब्रूतेग्नौ लाजानावपन्ती॥ दीर्घायुरस्तु मे पतिः शतं वर्षाणि जीव
त्वेधन्तां ज्ञातयो मम स्वाहा॥ गृहीतांजलिं वधूः [illegible] जुहोति॥ सोमतीर्थेन उक्तं च भविष्यपुराणे॥ धनायुर्वरदे
स्वायं सोमतीर्थेनुमध्यमे॥ लाजाहुतिं वनेतेन कर्तव्यं वपने तथा॥ वपने श्रीवारि निर्वापः॥ गृहीतांजलिं व
रः॥ अग्निं प्रणयति॥ कन्यलापितृभ्य इति॥ अस्मिन्मंत्रे दक्षस्य ऋषिः। त्रिष्टुप्छन्दः। अग्निर्देवता। परिणयने वि
6 नियोगः॥ कन्यलापितृभ्यः पतिलोकं यती यमपदीक्षामयष्ट॥ कन्या उत त्वया वयं धारा उदन्या इवातिगाहे
महि द्विषः॥ परिणयनीते पूर्ववदाश्मारोहणादि सर्वं॥ अभिघारणप्रत्यभिघारणके चिन्नमेन्यते॥ अर्यमणमिति द्वि
तीयः। अस्मिन्मंत्रे दक्षस्य ऋषिः। उपरिष्टाद्बृहती छन्दः। अर्यमा देवता॥ लाजाहोमे विनियोगः॥ अर्यमणमिति॥ क
२ त्रि१० न्यलापितृभ्य इति॥ पुनरग्निं प्रणयति। पूर्ववद्विछिंद्दर्शनमाश्ममेजीत्विस्याभिषेकान्तं॥ द्वितीयपरिणयनीते तैं
तथैव सर्वमारोहणादि पूषणमिति तृतीयहोमः॥ अस्मिन्मंत्रे दक्षस्य ऋषिः। अनुष्टुप्छन्दः॥ पूषा देवता। लाजाहो
मे विनियोगः॥ पूषणंनुदेवं०॥ कन्यला इति पूर्ववदग्निं प्रणयति॥ तृतीयपरिणयनीते पूर्ववदश्मारोहणादि
सर्वं॥ तूष्णीं शूर्पेणैव लाजाहोमं करोति॥ चतुर्थपरिणयनीते सप्तपदानीर्थे प्रागुदीच्यां दिशि वधूं स्नुहसेनयी
ति॥ एकैकमंडले दक्षिणेन पादेन वधूः आक्रामति। वामेन पादं पश्चात्करोति॥ ना सव्येन मदक्षिणमति क्रामेति
ब्रूयात् इति॥ एकमिषे इत्यादिसप्तभिर्मंत्रैः सप्तपदानि पृथक्पृथक् आक्रामति॥ सप्तसु मंत्रेषु दक्षस्य ऋषिः। यजुश्छन्दः॥ वि
ष्णुर्देवता॥ पादक्रमणे विनियोगः॥ एकमिषे विष्णुस्त्वा नयतु॥ द्वे ऊर्जे विष्णुस्त्वानयतु॥ त्रीणि व्रताय विष्णुस्त्वानय
तु॥ चत्वारि मायोभवाय विष्णुस्त्वानयतु॥ पंच पशुभ्यो विष्णुस्त्वानयतु॥ षड्रायस्पोषाय विष्णुस्त्वानयतु॥ सप्त
सप्तभ्यो होत्राभ्यो विष्णुस्त्वानयतु॥ वरो पठति॥ सखा सप्तपदी भव सख्यौ ते गमेयं सख्यं ते मा योषाः सख्यं
ते मा योष्ठाः। या स्त्रियः पुमांसो विवाहे उद्धं आगतास्तानिरीक्ष्य वरो जपेत्॥ सुमंगलीरिति॥ अस्मिन्मंत्रे

दक्षऋषिः। अनुष्टुप् छंदः। आशास्यमाना देवता॥ सुमंगलाजन प्रतिमंत्रणे विनियोगः॥ सुमंगलीरियं वधूरिमां
समेत पश्यत। सौभाग्यमस्यै दत्वायाथास्तं विपरेतन॥ इदं कुंकुमपुरुषः स्वर्णक कलितो ऽपराण्याग्निं प्रादक्षिण्येनागत्य
वरसमीपं पूर्वं गृहीतादुदकपूर्णात् कलशाद् दक्षिणहस्तेनोदकं गृहीत्वा वरवध्वोः शिरसि युगपदभिषिंचति। समं
जंतु विश्वेदेवा इति द्वितीय मंत्रे वरो जपेत्॥ अस्मिन्मंत्रे दक्षऋषिः। अनुष्टुप् छंदः। विश्वेदेवादयो देवता॥ अभिषेच
ने विनियोगः॥ समंजंतु विश्वेदेवाः समापो हृदयानि नौ॥ सं मातरिश्वा संधाता समुदेष्ट्री दधातु नौ॥ पूर्वगृहीत
मंजलिं वरः सव्यहस्तेन मणिबंधसमीपं धृत्वा दक्षिणहस्तेन वध्वा दक्षिणं पाणिं साङ्गुष्ठमुत्तानं गृहीत्वा
षण्मंत्रान् पाणिग्रहणीयानष्ट भागमित इति प्रभृतीन् जपति॥ षडेतेषु मंत्रेषु दक्षऋषिः। त्रिष्टुप् छंदः। प्रथमेन
४ निर गाद्योभिधीयमाना देवता॥ पाणिग्रहणे विनियोगः॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः॥
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ अघोरचक्षुरिति द्वितीय मंत्रे आशास्यमाना देवता। जपे विनि॥
ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः॥ वीरसूर्जीवसूर्देवकामा स्योना शं नो भव द्विपदे
शं चतुष्पदे॥ आ नः प्रजामिति तृतीय मंत्रे जगती छंदः। प्रजापतिर्देवता॥ जपे विनि॥ आ नः प्रजां जनयतु प्रजाप
तिराजरसाय समनक्त्वर्यमा॥ अदुर्मंगलीः पतिलोकमाविश शं नो भव द्विपदे शं चतुष्पदे॥ इमां त्वमिंद्रे
ति चतुर्थ मंत्रे इंद्रानुष्टुप्॥ जपे विनि॥ इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृधि॥ दशास्यां पुत्रानाधेहि पतिमेकाद
शं कुरु॥ सम्राज्ञीति पंचमे मंत्रे कन्या देवतानुष्टुप्॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव॥ ननांदरि सम्राज्ञी
भव सम्राज्ञी अधिदेवृषु॥ मम व्रत इति षष्ठमंत्रे बृहस्पतिस्त्रिष्टुप्॥ जपे विनि॥ मम व्रते ते हृदयं दधातु मम चित्त
मनु चित्तं ते अस्तु॥ मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं॥ एवं पाणिग्रहणांते उभौ अग्निसमीप
मागत्य पूर्ववदुपविश्य प्रायश्चित्तार्थं चतस्रो व्याहृतीर्हुत्वा पुनः स्विष्टकृदादि संस्थितं समाप्य यथाशक्ति दक्षि
णां पूर्णपात्राणि दिक् दत्वा ब्राह्मणभोजनसंकल्पं कृत्वा वामदेव्यगीतां समापयेत्॥ वामदेव्यं तु चेत् गायेत्॥ वा
मदेव्य साम्नि वामदेव ऋषिः। गायत्री छंदः। प्रजापतिर्देवता। [illegible] विनियोगः॥ का५या॥ [illegible]॥ उत्कोत्सितवि

आरोपे ध्रुवमिति दर्शनमुच्यते ॥ आयुष्यचोषि हृष्यमित्युपकुलगृहे पाणिग्रहणकर्मणोनंतरं वरः सहयो वधूः ॥ सहवधूः स्न
पति ॥ वरः प्रथमेऽशुचौ देशे लक्षणपूर्वमग्निं प्रणयति ॥ समिधं च तत्र ददाति ॥ ततः स्नेः पश्चादानडुहं लोहितं च
र्म प्राग्ग्रीवमुत्तरलोमास्तीर्य तस्मिन्नेनां कन्यां मोजिनीमुपवेशयेत् ॥ सा तत्रोपविष्टा आनक्षत्रदर्शनादासोद
श्यते ध्रुव इति केनचिदुक्ते वरो ब्रह्मोपवेशनादि विरूपाक्षान्ते समिधं दत्वा स्रुवं संमार्ज्य न पूतपत्नेत्वा पू
र्वं वधूस्य दक्षिणाम ॐ समन्वारब्धायां व्याघ्रीमहाव्याहृतिभिस्तिसृभिर्हुत्वा लेखासंधि पिहित्येतत्प्रभृति
षडाज्याहुती जुहोति ॥ आहुते आहुते बिन्दुशेषं वध्वाः शिरस्येवानयेत् ॥ व्याहृतीनां बिन्दुशेषं नावनयेत् ॥ ले
खासंधि भ्रुवित्येतत्प्रभृति षण्मंत्रेषु दक्ष ऋषिः ॥ अनुष्टुप् छन्दः ॥ कन्या देवता ॥ कन्योगक्षितानस्नपनाधाने वि
नियोगः ॥ लेखासंधिषु पक्ष्मस्वावर्तेषु च यानि ते ॥ तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॐ स्वाहा ॥१॥ केशे
षु यच्च पापकमीक्षिते रुदिते च यत् ॥ तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॐ स्वाहा ॥२॥ शीले यच्च पापकं भाषिते हसि
ते च यत् ॥ तानि ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॐ स्वाहा ॥३॥ आरोकेषु च दन्तेषु हस्तयोः पादयोश्च यत् ॥ तानि
ते पूर्णाहुत्या सर्वाणि शमयाम्यहम् ॐ स्वाहा ॥४॥ ऊर्वोरुपस्थे जंघयोः संधानेषु च यानि ते ॥ तानि ते पूर्णाहुत्या
सर्वाणि शमयाम्यहम् ॐ स्वाहा ॥५॥ यानि कानि च घोराणि सर्वाङ्गेषु तवाभवन् ॥ पूर्णाहुतिभिराज्यस्य सर्वा
णि तान्यशीशमम् ॐ स्वाहा ॥६॥ तदनंतरं वध्वाः सह बहिरुत्तरतो गत्वा वरो वधूं ब्रूयात् ॥ ध्रुवं पश्यति ॥ तथा ध्रु
वमसि ध्रुवाहं यशोदा देवदत्त पतिकुले भूयासमिति ॥ वरो वधूं भाषयेत् ॥ वधूश्च इमं मंत्रं जपमाना ध्रुवं पश्ये
दिति ॥ अरुन्धतीं पश्येदिति वरं ब्रूयात् ॥ तथा अरुन्धत्यसि रुद्धाहं ॥ यशोदास्मि देवदत्तेति वधूं भाषये
त् ॥ वधूश्च इमं मंत्रं जपति ॥ अरुन्धतीं पश्यति ॥ अथ तत्राञ्जलिं वरो वधूं सन्मुखो भूत्वा ध्रुवा द्यौरिति मंत्रं ज
पेत् ॥ अस्मिन्मंत्रे दक्ष ऋषिः ॥ अनुष्टुप् छन्दः ॥ आशास्यमाना देवता ॥ ध्रुवानुमंत्रणे विनियोगः ॥ ध्रुवा द्यौ
ध्रुवा पृथिवी ध्रुवं विश्वमिदं जगत् ॥ ध्रुवासः पर्वता इमे ध्रुवा स्त्री पतिकुले इयम् ॥ ततो वधू रात्रीयु कण्ठस्पृ
र्श पूर्वं भर्तुः पादौ स्पृष्ट्वा दक्षिणहस्तेन दक्षिणं सव्येन सव्यं भर्तृगोत्रेणाभिवादनपूर्वं पादवंदनं कुर्यात् ॥

प्रयोगः कथ्यते॥ अमुकगोत्रः प्रवरः अमुकशर्माहं भो अभिवादये मा इति पतिः स्वाशिषं ददाति॥ कश्चित्तु हृदये[?] ...
येत॥ अत्र वाग्विसर्गो वाचः अपाग्नेः पश्चादुपविश्य प्रायश्चित्तं चरुं तिसृभिर्व्याहृतिभिर्हुत्वा पुनस्तिसृभिर्हुत्वा समि
दादि तंत्रं समाप्य पूर्णपात्रं यथाशक्ति दक्षिणां दत्वा ब्राह्मणभोजनं संकल्प्य संस्रावपूर्वकं वामदेव्यं गायेदिति॥ प्रागुदीच्यां
दिशि यद्भिस्रुगगृह्य उक्ते तदभावे कन्यावतो गृहे वेदिं दृष्ट्वा किंचिद्देशान्तमाश्रित्य पूर्वोक्तं कर्म कुर्यात्॥ अकरणादेतदपि
वरे सोऽप्रति— शिष्टाः तस्मिन्नेव विवाहाग्नौ लवनं तत्र क्षिप्रहोमन्यायेन कुर्युः॥ अत्र ग्रामधर्मा जनपदधर्माश्च कर्तव्याः॥
स्त्रियो यत्कारयंतीति तत्कर्तव्यमिति॥ इति ध्रुवदर्शनं॥ अत ऊर्ध्वं भोजनं कुर्यात्॥ अक्षारालवणाशिनौ तरस्यां॥
एकस्मिन्नास्तरे ब्रह्मचारिणौ सीलौ शयीयातामिति नियमः॥ प्रथमभोजने विशेषः कथ्यते॥ एकस्मिन्पात्रे यथासिद्धे
मन्नं हविष्ये द्विः सकृदा एकं भागं [?] सोनाभिमृशेत॥ अन्नपाशेन मणिनेति॥ अस्मिन्मंत्रे दससर्षिः॥ अ
नुष्टुप्छंदः॥ अन्नं देवता॥ अन्नप्राशने विनियोगः॥ अन्नपाशेन मणिना प्राणसूत्रेण पृश्निना॥ बध्नामि सत्यग्रंथि
ना मनश्च हृदयं च ते॥ अथ यदेतद्धृदयमिति मंत्रं जपेत॥ अस्मिन्मंत्रे दससर्षिः द्विपदा गायत्री [?]सि॥ अ
न्नं च यध्मश्च देवते हृदये करणोन्नस्तु तौ च विनियोगः॥ यदेतद्धृदयं तव तदस्तु हृदयं मम॥ यदिदं हृदयं मि
मतदस्तु हृदयं तव॥ अन्नं प्राणस्य षड्विंशस्तेन बध्नामि त्वा असौ॥ यस्मिन् जपितमन्नं तत्पतिः स्वयं भुंजीत प्रथमं
यद्वितीयं भागमनभिमंत्रितं तत्पात्रस्थमुच्छिष्टं पश्चाद्वधूर्भुंजीत॥ भोजनसंभवे उपवासे संजाते प्रातस्समशनी
यं चरुं श्रपयित्वा हुत्वा पूर्वोक्तेन विधिना भुंजीत॥ समशनीयस्थालीपाकस्य देवता॥ अग्निः प्रजापतिर्विश्वेदेवा
अनुमतिरिति॥ स्थालीपाकधर्मेण श्रपयित्वा स्थालीपाकं आज्ये निक्षिप्य मेक्षणेनोपघातं जुहुयात्॥ अवदा
नधर्मेण जुहुयात॥ उद्धृत्य स्थालीपाके पात्रीतरे संस्राव्य पूर्वैकदेशे पाणिनाभिमृशेद् अन्नपाशेन मणिनेति॥ पू
र्वोक्तं विधिं [illegible] च [illegible] ॥ अथ [illegible] यानमारोह्य स्वगृहं
नयति॥ यानमारोहे [illegible] तिं जपेत॥ सुकिंशुकं [illegible] ॥ अस्मिन्मंत्रे दससर्षिः॥ त्रिष्टुप्छंदः॥ कन्या देवता॥
[illegible] यादियानमारोहणे विनियोगः॥ सुकिंशुकं [illegible] वर्णं सुवृतं सुचक्रं॥ आरोह सू

...म्। तस्य नाभिः स्योनं पत्ये वहतुं सगृह्य॥ मार्गे यत्र यत्र चतुष्पथा नद्यो दुर्गाणि च महावृक्षाः श्मशानानि च भवे-
युस्तत्र तत्र मा विदन्परिपन्थिन इति जपेत्॥ अस्मिन्मन्त्रे दक्ष ऋषिः। अनुष्टुप् छन्दः। आशास्यमाना देवता। चतुष्पथा-
दिदर्शने विनियोगः॥ मा विदन्परिपन्थिनो य आसीदन्ति दम्पती। सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः॥ रथाङ्गभङ्ग-
[illegible] जेत्। तामुक्तलक्षणपूर्वं विवाहाग्निं प्रणीय प्रज्वाल्य चाज्यसंस्कारान्हित्वा प्रहोमन्यायेन व्याहृतिभिः प्रायश्चि-
त्तं हु[illegible]तनं रथाङ्गमाहृत्य। यस्ते चिदभिश्रिष इत्येतत्साम गीत्वा ज्यशेषेणाभ्यञ्जनं कुर्यात्॥ अत्र प्रजापतिर्ऋषिः।
बृहती छन्दः। मघवा देवता। अभ्यञ्जने विनियोगः। ततो वामदेव्यं गीत्वा वधूमारोहयेत्॥ यत्रैव प्रायश्चित्तमामायति ते-
न यति। तत्रैव तत्काले द्विप्रहोमन्यायेन हुत्वाऽथान्वेष्टेत्॥ कर्मण्यपि पाते प्रायश्चित्तं तत्कालमिति कात्यायनव-
चनात्॥ यत्र यत्र गृहप्रवेशनं दृश्यते तत्र साम प्रतेतव्यमिति सर्वत्र॥ अथ गृहद्वारात्प्रतोलीसमीपं प्राप्य वामदे-
व्यं गीत्वा वधूं मण्डपसमीपं नयति॥ आं गृणगतां पतिपुत्रिणी लक्ष्मणा ब्राह्मण्यो यावा देवता। अस्मिन्मन्त्रे दक्ष ऋषिः।
अनुष्टुप् छन्दः। गावो देवता। गृहप्रवेशने विनियोगः॥ अथ उत्तरस्यां उत्सङ्गे कुमारमुपवेश्य कुमार्यञ्जलिं कृत्वा
टेः सीर्यफलैर्वा कुमार उत्थापयेति॥ ता एव ब्राह्मण्य पतिर्यां कुमारमुत्थापयेत्॥ अथ वरलक्षणपूर्वमग्निं प्र-
णीय समाधिं दत्त्वा ब्रह्मोपवेशनादि विरूपाक्षीं तेन समिधं दत्त्वा स्रुवसंमार्जनपर्यन्तं कुर्यात्॥ आज्यसं-
स्कारावसरे स्रुवसंस्कारं कृत्वा तिसृभिर्व्याहृतिभिर्हुत्वा घृतेनैवाज्याहुतीर्जुहोति॥ अष्टाविह धृतिरिति॥
इह धृतिः स्वाहा॥ इह स्वधृतिः स्वाहा॥ इह रन्तिः स्वाहा॥ इह रमस्व स्वाहा॥ मयि धृतिः स्वाहा॥ मयि स्वधृतिः स्वाहा॥
मयि रमः स्वाहा॥ मयि रमस्व स्वाहा॥ अथ चतुर्थीकर्म प्रयोगः कथ्यते॥ कर्मप्रदीपोक्तनिबन्धविरोधात्॥ धृति हो-
मेन प्रयुज्यातो नामसु तथाष्टसु। चतुर्थीमध्य इत्येतत्तेनाग्निर्न हि हूयते॥ इह धृतिः प्रभृति दक्ष ऋषिः। बृह-
ती छन्दः। कन्या देवता॥ होमे विनियोगः॥ अत्र मन्त्रप्रयोगी हुत्वा व्याहृतिभिश्चतसृभिर्हुत्वा पुनस्तिसृभिर्हुत्वा
समिधं दत्त्वा॥ विद्यागुरुप्रभृति यथाज्येष्ठं गुरूनभिवादयेत्॥ गोत्रः प्रवरः अमुकशर्माहं भो अभिवाद-
यामि॥ स्वकर्णं स्पृष्ट्वा दक्षिणेन हस्तेन दक्षिणं हस्तं सव्येन सव्यं गुरूणां पादवन्दनं कुर्यात्॥ यथाज्येष्ठं वधू-

रपिपादवेदनेकुर्यात॥ ततः पर्युक्षणादि तंत्र समाप्य वामदेव्यगानं। इति॥ अथ चतुर्थदिने प्राप्ते चतुर्थीकर्म॥ तत्र मातृपू
जनस्यनवदेवत्यस्य श्राद्धस्य शाकायन कुर्यात॥ विवाहादीनि चतुर्थीपर्यंतानि याज्ञिककर्माणि तेषामेकमेव मातृपूज
नं श्राद्धं वा कर्मप्रदीपो क्लृत्वा॥ अथ लक्षणपूर्वमग्निं प्रणीय समिधं दत्वा महाव्याहृतित्रयं हुत्वा॥ अग्ने प्रायश्चि
त्त इत्यादिपंचस्वपि मंत्रेषु पापी लक्ष्मीरिति पदमुद्दिश्य पंचाज्याहुतीर्जुहोति॥ अग्ने प्रायश्चित्त इत्यादिभिः पंचभिर्मं
त्रैः पतिघ्नीरिति पदमुद्दिश्य पंचाज्याहुतीर्जुहोति॥ पुनरप्येभिः पंचभिर्मंत्रैः अपुत्र्येति पदमुद्दिश्य पंचाज्याहुतीर्जु
होति॥ पुनरप्येभिः पंचभिर्मंत्रैः अपशव्येति पदमुद्दिश्य पंचाज्याहुतीर्जुहोति॥ एवं आहुतिविंशतिं जुहोति॥ आहुतेः
राहुतेर्बिंदुश्शेषमुदकपात्रेऽवनयेत॥ ततो नाज्यमिश्रेणोदकेन वधूमामूर्धतः नखमस्तकामभ्यज्यो कृत्तनादि
भिस्तत्पाद्यं हास्यापयित्वा स्नापयेति॥ स्नातायां प्रायश्चित्तार्थं चतस्रभिर्व्याहृतिभिर्हुत्वा पुनस्तिस्रभिः समि
दार्द्रं सर्वं सत्वा दक्षिणां दत्वा वामदेव्यगीत्वा समापयेत॥ कर्मांते सर्वत्र ब्राह्मणभोजनसंकल्पः॥ चतुर्थी
कर्मणि पत्न्या उपवेशनं गोभिलनोक्तं॥ स्त्रीणामाचारात्वेदुपविशति॥ तदा वामभागे उपविश्यति॥ स्नानादने
तरं॥ न च पूर्वं अनुकत्वादिति॥ कर्थं विंशाहुती पक्षे आहतः॥ कर्मप्रदीपः॥ मंत्राम्नायेऽग्न इत्येतत्पंचकलाघ
वार्थिभिः॥ प्रज्वलेतत्प्रयोगेस्यान्मं त्राणामविंशतिः॥ अग्नेस्थाने वायुचंद्रसूर्य बहुवदूहश्च॥ समस्यपं
चमी सहस्ते चतुष्वनुरितिक्रतेः॥ प्रथमेपंचके पापीलक्ष्मीरिति पदं भवेत्॥ अपि पंचसु मंत्रेषु रतियज्ञवि
दाविदुः॥ द्वितीये तु पतिघ्नीस्यादपुत्र्येति तृतीयके॥ चतुर्थे त्वपशव्ये स्याज्याहुतिविंशके॥ पंचमंत्रो बहुवत्कल्प
न्नहेतः॥ अग्निवायुचंद्रसूर्या प्रायश्चित्तयोयूयं देवानीप्रायश्चित्तयस्थ ब्राह्मणो वोनाथकाम उपधावामि यास्याः पापी
लक्ष्मी तन्यास्या अपहत स्वाहेति॥ इत्थं प्रयोगः॥ पतिघ्नीरिति॥ अपुत्र्या इति॥ अपशव्या इति॥ शब्दविशेषः॥ कश्चित्पंचा
ज्याहुतिर्मन्यीते॥ तेत तथाकुर्वंति॥ विंशाहुति पक्षेऽस्माकं मतं इति॥ अग्नेः प्रायश्चित्ताइत्यादीनि मंत्राणोदस
प्तर्षिः यजुषात्रयोना स्तीति॥ प्रथममंत्रेऽग्निर्देवता द्वितीये वायुस्तृतीये चंद्रश्चतुर्थे सूर्यः पंचमे समस्य अग्न्या
ग्न्यादयः॥ सर्वे देवा देवता॥ यथाव [illegible] येष्वदेन होमादि गृह्योक्तं सर्वं कुर्यादिति॥

इति चतुर्थी कर्म ॥ विवाह कर्म चतुर्थी पर्यंतम् अग्निहोत्री विष्णु [illegible] मापुरेण सती समाप्तम् इति ॥ सं. ७८ श. १८५३ फाल्गु
ण शुदि २ गुरो लिखितं [illegible] डीकेन ॥ शुभं भवतु ॥

वीवाहनी पोथी

श्रीगणेशाय नमः ॥ अथ ब्राह्म्यविवाहाङ्गभूतवाग्दानविधिः ॥ तत्र ज्योतिर्विदादिष्टे वैशाखादिके मासि विवा
हनक्षत्रयुते शुभे काले द्वौ चत्वारोऽष्टादयो वा ब्राह्मणास्तत्र वेषाचरेण तत्र पित्रादिना वलिभिः स्त्रीभिः स
ह शकुनावलोकनपूर्वकं कन्यापित्रादि वरस्य पितुर्गृहे गत्वा शुभे सवस्त्रपीठासने उपविश्य वरस्य पि
त्रादीन् प्राङ्मुखानुपवेश्य कन्यापित्रादिः प्राङ्मुख उपविश्याचम्य देशकालौ स्मृत्वा करिष्यमा
णविवाहाङ्गभूतवाग्दानमहं करिष्ये इति संकल्प्य गंधादिदक्षिणांतैरुपचारैर्गणपतिं संपूज्य
वरपित्रादीनपि पूजयेत् । ततो वर उपवीतफलपुष्पवस्त्रादिभिः पूजयेत् ॥ अथ वरपित्रादिः कन्या
पित्रादीन् पूजयेत् । ततः स्वस्तिशब्दादि मंगलशब्दाननुच्चार्य दाता सप्त पूगीफलानि हरिद्रादि मंगल
द्रव्यमादाय अमुकसगोत्रोत्पन्नायामुकपुत्रायामुकशर्मणे अमुकगोत्रोत्पन्नां अमुकपुत्रीं अमुकी
नाम्नीं कन्यां ज्योतिर्विदादिष्टे मुहूर्ते दास्ये वाचा संप्रददे ॥ इत्युक्त्वा अव्यंगे पतिते क्लीबे दशदोषा
विवर्जिते ॥ मम कन्यां प्रदास्यामि देवाग्निगुरुसन्निधौ ॥ इति पठित्वा वरपित्रादिहस्ते पूगीफ
लानि दद्यात् । ततस्तथैव वरपित्रादि पूगीफलानि गृहीत्वा अमुकसगोत्रा अमुकवरविषये भ
वतो निश्चिंता भवंतु इत्युक्त्वा दातृहस्ते दद्यात् ॥ ततो दाता वाचा दत्ता मया कन्या पुत्रार्थं स्वीकृता
त्वया ॥ कन्यावलोकनविधौ निश्चितस्त्वं सुखी भवेति पूगीफलं दातारं प्रति प्रदद्यात् । अत्रादौ स्त्री
कर्तृदीप्तानर्घः सिवायापूजा कार्या ॥ ततो ब्राह्मणाः शिवा आपः संत्वित्यादि एतद्वः सत्यमस्त्विति
ब्रूयुः ॥ ततो वाग्दानदिवसादारभ्य कन्या पात्रस्थितास्ति ततः कुलपूजे शचीमावाह्य गंधादिभिरुप
चारैः पूजयेत् विवाहपर्यंतं संपूज्यैवं प्रार्थयेत् । देवेन्द्राणि नमस्तुभ्यं देवेन्द्रप्रियभामिनि ॥ विवा
हं भाग्यमारोग्यं पुत्रलाभं च देहि मे [illegible] आशीर्मंत्रान्पाठयेत् ॥ इति वाग्दा

[illegible]

-थं॰ दृष्यारोची [illegible] स्य च ॥ [illegible] अंश्व वायव्ये कुंभाद्याश्चैव नैर्ऋते ॥ १ ॥ -५
.वास्तोष्पतायीति मंत्रेण -५

श्री गणेशाय नमः ॥ वर्णकाचारोलिख्यते ॥ आच॰ प्राणा [illegible] त्य॰ सुमुख॰ सर्व दा॰ अपवित्र: प॰ इय॰
देव॰ सखि॰ स्वाहा॰ नमोनमः ॥ स्पर्शांच्च ॥ मंडपाधिष्ठात्रिदेवतानां स्थापन-पूजनं वर्णकाचारोपहा॰
स्क ॥ ॐ भूरादि॰ पात्र ॥ उपासे॰ मधुरुप्यचे स्यादि॰ थं यजमानसुतस्य विवाह॰ थं मंडपा॰ ष्ठा पूजनं
वर्णकाचारमहं॰ तदंगत्वेन गणेशपूजनं ॥ तत्पुरूषायेति पूजनं ॥ अथ मंलि खित गणेशप्रतिष्ठापूजनं
च ॥ शमी शाखा यीजोहकें कर्णं बध्वा मुहूर्तं विचार्य धवांयोरिति मंत्रत्रयेण घ्य ॥ प्रतिष्ठाप्य संपू
ज्य ॥ हरिद्रादिनामी गस्यलेपनं कार्यं पादयोर्जंघयोः स्कंधयोः शिरसि ॥ इतिवरस्य ॥ कन्यायाःकु
र्वीत विपरीतं ॥ वरो गुडपूगहरिद्रालवणादिति प्रत्येकं सोवासनीभ्योदद्यात् ॥ चतस्रो स्त्रीभिः
यत्र= वर्धापनं कुर्युः ॥ पुण्याहं दी॰ ब्राह्मणभोजन संकल्पः दक्षि॰ भूयसी॰ मंडपप्रतिष्ठा वर्णकाचार॰
लो॰ न्यूनता॰ मस्तु ॥ आशी: ॥ संपूर्णं ॥ शुभं भवतु ॥ सं॰ १८८ माघस॰ ६ शुक्रे लि॰ सस्तजी केन [illegible] ॥

पुस्तकमिदं त्र ॥ आशाधरस्य किवाद
दे..

स्था ५